योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः ०५२

द्विपञ्चाशः सर्गः ५२

श्रीराम उवाच ।

बोधो जगदिवाभाति मुने येन क्रमेण ह ।

तं क्रमेण क्रमं ब्रूहि भूयो भेदनिवृत्तये ।। १

श्रीवसिष्ठ उवाच ।

वृक्षस्येव विमूढस्य यद्दृष्टौ तत्स्वचेतसि ।

यन्न दृष्टौ न तच्चित्ते भवत्यल्पतरस्मृते ।। २

भव्यः पश्यति शास्त्रार्थमेव पूर्वापरान्वितम् ।

न दृष्टिविषयं वस्तु यत्पश्यति करोति तत् ।। ३

भावानुष्ठाननिष्ठः सन् शास्त्रार्थैकमना मुनिः ।

भूत्वोपदेशं त्वमिमं श्रृणु श्रवणभूषणम् ।। ४

इयं दृश्यभरभ्रान्तिर्नन्वविद्येति चोच्यते ।

वस्तुतो विद्यते नैषा तापनद्यां यथा पयः ।। ५

उपदेश्योपदेशार्थमेनां मदुपरोधतः ।

सत्यामिव क्षणं तावदाश्रित्य श्रूयतामिदम् ।। ६

कुत एषा कथं चेति विकल्पाननुदाहरन् ।

नेदमेषां न चास्तीति स्वयं ज्ञास्यसि बोधतः ।। ७

यदिदं दृश्यते किंचिज्जगत्स्थावरजंगमम् ।

सर्वं सर्वप्रकाराढ्यं कल्पान्ते तद्विनश्यति ।। ८

अस्य भागविभागात्मा नाशोऽवश्यमवारितः ।

बिन्दुना बिन्दुना बोधे उद्धृतस्यास्ति हि क्षयः ।। ९

एवं स्थिते द्रव्यनाशे ब्रह्मणस्तन्मयत्वतः ।

नानन्तत्वं न चास्तित्वं न च वै संभवत्यलम् ।। १०

मदशक्तिरिव ज्ञानमिति नास्मासु सिध्यति ।

देहो विज्ञानतोऽस्माकं स्वप्नवन्न तु तत्त्वतः ।। ११

नश्यत्येव च दृश्यश्रीः सैव नान्यैव नैव च ।

इत्थं भवेत्समुचितं कृतं शास्त्रं च नान्यथा ।। १२

सैवैतीत्यसमुल्लेखं कथं नष्टस्य संभवः ।

तद्रूपान्येति युक्तं स्यादनुभूतानुगा वयम् ।। १३

सैव व्योमतयैवासीदित्यसत्सैव सा कथम् ।

तथैव व्योमसंस्था चेन्नाशं तर्हि न सा गता ।। १४

कार्यकारणयोरेकरूपतैवं यदा तदा ।

कार्यकारणताभावादैक्यमेवास्मदागमः ।। १५

शून्यत्वमुपलम्भत्वं यद्गतं नष्टमेव तत् ।

अन्यस्तर्हि भवेन्नाशः कीदृशः किल कथ्यताम् ।। १६

नष्टं भूयस्तदुत्पन्नमिति यत्प्रत्ययेति कः ।

नश्यत्यवश्यं तेनेदं पुनरन्यत्प्रवर्तते ।। १७

मध्ये मध्ये यदुत्सेधफलाद्यवयवैकिका ।

आदेहं बीजसत्तास्ति कार्यकारणता कुतः ।। १८

देशकालक्रियात्मैकं यथादृष्टमिह स्थितम् ।

बीजमेवैककर्मातो न घटः पटकार्यकृत् ।। १९

सर्वदर्शनसिद्धान्ते नास्ति भेदो न वस्तुनि ।

परमार्थमये तेन विवादेन किमत्र नः ।। २०

इदं शान्तमनाद्यन्तं तद्रूपत्वाद्विचारतः ।

व्योमाभं बोधतामात्रमनुभूतिप्रमाणतः ।। २१

यथैतन्नानुभूतं सद्यथैतदनुभूयते ।

यथैतत्सिद्धिमाप्नोति तदिदं कथ्यते क्रमात् ।। २२

महाकल्पान्त उन्नष्टे सर्वस्मिन्दृश्यमण्डले ।

आमहादेवपर्यन्तं समनोबुद्धिकर्मणि ।। २३

व्योमन्यपि शमं याते कालेऽप्यकलितस्थितौ ।

वायावपि त्वपगते तेजस्यत्यन्तमस्थिते ।। २४

तेजस्यपि गते ध्वंसं वार्यादौ सुचिरं क्षते ।

अलमन्तमनुप्राप्ते सर्वशब्दार्थसंचये ।। २५

शिष्यते शान्तबोधात्म सदच्छं बाध्यवर्जितम् ।

अनादिनिधनं सौम्यं किमप्यमलमव्ययम् ।। २६

अवाच्यमनभिव्यक्तमतीन्द्रियमनामकम् ।

सर्वभूतात्मकं शून्यं सदसच्च परं पदम् ।। २७

तन्न वायुर्न चाकाशं न बुद्ध्यादि न शून्यकम् ।

न किंचिदपि सर्वात्म किमप्यन्यत्परं नभः ।। २८

तद्विदा तत्पदस्थेन तन्मुक्तेनानुभूयते ।

अन्यैः केवलमाम्नातैरागमैरेव वर्ण्यते ।। २९

न कालो न मनो नात्मा न सन्नासन्न देशदिक् ।

न मध्यमेतयोर्नान्तं न बोधो नाप्यबोधितम् ।। ३०

किमप्येव तदत्यच्छं बुध्यते बोधपारगैः ।

शान्तसंसारविसरैः परां भूमिमुपागतैः ।। ३१

प्रतिषिद्धा मयैते तु येऽर्थाः सर्वत्र ते स्थिताः ।

अस्मद्बुद्ध्या परिच्छेद्याः सौम्याम्भोधेरिवोर्मयः ।।३२

यथास्थितं स्थिताः सर्वे भावास्तत्र यथा तथा ।

अनुत्कीर्णा महास्तम्भे विविधाः शालभञ्जिकाः।। ३३

एवं तत्र स्थिताः सर्वे भावा एवं च न स्थिताः ।

असर्वात्मैव सर्वात्म तदेव न तदेव च ।। ३४

पदं यथैतत्सर्वात्म सर्वार्थपरिवर्जितम् । ।

यथा तत्र च पश्यन्ति तत्रैकपरिणामिनः ।। ३५

सर्वं सर्वात्मकं चैव सर्वार्थरहितं पदम् ।

सर्वार्थपरिपूर्णं च तदाद्यं परिदृश्यते ।। ३६

तवैतावन्महाबुद्धे सर्वार्थोपशमात्मकम् ।

न सम्यग्दानमुत्पन्नं संशयोऽत्र निदर्शनम् ।। ३७

यः प्रबुद्धो निराभासं परमाभासमागतः ।

स्वच्छान्तःकरणः शान्तस्तं स्वभावं स पश्यति ।। ३८

अयं त्वमहमित्यादित्रिंकालगजगद्भ्रमः ।

तत्रास्ति हेमपिण्डान्तरिव रूपकजालकम् ।। ३९

हेमपिण्डाद्यथा भाण्डजालं नानोपलभ्यते ।

तथा न लभ्यते भिन्नं परमार्थघनाज्जगत् ।। ४०

सर्वदैव हि भिन्नात्मा स्वाङ्गभूतोपलम्भदृक् ।

स जगद्द्वैतमेवेदं हेमेवाङ्गदरूपकम् ।। ४१

रिक्तं देशादिशब्दार्थैर्देशकालक्रियात्मकम् ।

यथास्थितमिदं तत्र सर्वमस्ति न वास्ति च ।। ४२

यथोर्म्यादि समे तोये चित्रं चित्रकृदीहते ।

भाण्डवृन्दं मृदः पिण्डे तथेदं ब्रह्मणि स्थितम् ।। ४३

तथैतदत्र नो भिन्नं नाभिन्नं नास्ति चास्ति च ।

नित्यं तन्मयमेवाच्छं शान्ते शान्तमिदं तथा ।। ४४

अनिखातैव भातीयं त्रिजगच्छालभञ्जिका ।

स्वरसस्येव दृश्यत्वमिता ब्रह्मणि दारुणि ।। ४५

निखाता दृश्यतां यान्ति स्तम्भस्थाः शालभञ्जिकाः ।

अस्मिन्नक्षोभ्य एवान्तस्तरङ्गाः सृष्टिदृष्टयः ।। ४६

सरस्यतिरसे भान्ति चिद्घनामृतवृष्टयः ।

अविभागे विभागस्था अक्षोभे क्षुभिता इव ।

अविभाता विभान्तीव चिद्घने सृष्टिदृष्टयः ।। ४७

परमाणौ परमाणावत्र संसारमण्डलम् ।

विभाति भासुरारम्भं न विभाति च किंचन ।। ४८

आकाशकालपवनादिपदार्थजात-

मस्याङ्गमङ्गरहितस्य तदप्यनङ्गम् ।

सर्वात्मकं सकलभावविकारशून्य-

मप्येतदाहुरजरं परमार्थतत्त्वम् ।। ४९

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मोक्षोपायेषु निर्वाणप्रकरणे उ० ब्रह्मस्वरूपवर्णनं नाम द्विपञ्चाशः सर्गः ।। ५२ ।।